त्रयोदशः पाठः १३

# गणतन्त्रदिवसः

## ( इकारान्त-पुँल्लिङ्गः, लृट्लकारः, अनुस्वारसंधिः )

( रविः स्वगृहे वस्त्राणां समीकरणं करोति। समीकरणेन सह एव सः गीतगायनस्य अभ्यासम् अपि करोति। तस्य कनिष्ठा भगिनी सुधा एतत् पश्यति। तदा सा रविं जिज्ञासापूर्वकं पृच्छति।)



**सुधा**- भ्रातः! त्वम् एतत् सर्वं किमर्थं करोषि ? कः विशेषः ?

**रविः**- सुधे! त्वं न जानासि ? श्वः जनवरीमासस्य षड्विंशतितमः दिनाङ्कः (२६ जनवरी)। अस्मिन् एव दिवसे अस्माकं भारतदेशस्य नूतनसंविधानस्य आरम्भः अभवत्। अतः प्रतिवर्षम् एतस्य दिनस्य आयोजनं गणतन्त्रदिवसरूपेण भवति। श्वः अस्माकं विद्यालये अपि समारोहः भविष्यति। अतः अहं तस्य कृते सज्जतां करोमि।

**सुधा**- अस्मिन् समारोहे किं किं भविष्यति ? के कार्यक्रमाः भविष्यन्ति ?

**रविः**- समारोहे बहवः कार्यक्रमाः भविष्यन्ति। सर्वप्रथमं प्रातः अष्टवादने अस्माकं प्रधानाचार्यः ध्वजारोहणं करिष्यति। ध्वजारोहणस्य पश्चात् वयं राष्ट्रगानं गास्यामः। दशमीकक्षायाः बालिकाः स्वागतगानस्य गायनं करिष्यन्ति। तत्पश्चात् वयं पथसञ्चलनं व्यायामप्रदर्शनं च करिष्यामः।

**सुधा**- समारोहे त्वं किं करिष्यसि ?

**रविः**- अहं हरिणा सह गीतस्य प्रस्तुतिं करिष्यामि। मम कक्षायाः छात्राः संस्कृतनाटिकायाः प्रदर्शनं करिष्यन्ति। तत्र अहं वेदव्यासमुनेः अभिनयं करिष्यामि।

**सुधा**- बहुशोभनम्। इतोऽपि किं किं भविष्यति?

**रविः**- राजस्थानस्य लोकगीतस्य उपरि नृत्यं भविष्यति। मम मित्रं नरेन्द्रः कवितापाठं करिष्यति। उत्तमानां छात्राणां कृते अतिथयः पुरस्कारान् दास्यन्ति। कार्यक्रमस्य अन्ते राष्ट्रगीतं भविष्यति। वयं उद्घोषवाक्यानि वदिष्यामः। सर्वेषां कृते मिष्टान्नवितरणं भविष्यति। तत्पश्चात् सर्वे गमिष्यन्ति।

**सुधा**- उत्तमम्! अहमपि श्वः विद्यालयं चलिष्यामि।

**रविः**- आम्। आवां अवश्यमेव सह एव चलिष्यावः।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| स्वगृहे | निजगेहे | अपने घर पर |
| समीकरणं | सम्यक्करणम् | इस्तरी करना |
| सह | साकम् | साथ |
| कनिष्ठा | लघ्वी | छोटी |
| भगिनी | स्वसा | बहिन |
| जिज्ञासापूर्वकम् | उत्सुकतापूर्वकम् | उत्सुकता से |
| किमर्थम् | किं निमित्तम् | किसलिए |
| श्वः | आगामिदिनम् | आने वाला कल |
| बहवः | अनेके | बहुत सारे |
| ध्वजारोहणम् | ध्वजस्य आरोहणम् | झण्डा फहराना |
| गास्यामः | गानं करिष्यामः | गायेंगे |
| पथसञ्चलनम् | मार्गप्रयाणम् | पथसंचलन (परेड) |
| मुनेः | ऋषेः | मुनि का |
| इतोऽपि | अन्यदपि | और भी |
| उपरि | ऊर्ध्वम् | ऊपर |
| अन्ते | समाप्ति-समये | अन्त में |
| उद्घोषवाक्यानि | जयघोषवाक्यानि | जयघोष (नारे ) |
| अवश्यमेव | निश्चयेन | अवश्य ही |

## अभ्यासः

**१. उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| गणतन्त्रदिवसः | कनिष्ठा | जिज्ञासापूर्वकम् | पृच्छति |
| षड्विंशतितमः | नूतनसंविधानस्य | श्वः | ध्वजारोहणम् |
| वेदव्यासमुनेः | इतोऽपि | उद्घोषवाक्यानि | पथसञ्चलनम् |

**२. एकपदेन उत्तरत –**

(क) रवेः कनिष्ठा भगिनी का ?

(ख) रविः केन सह गीतस्य प्रस्तुतिं करिष्यति ?

(ग) कार्यक्रमस्य अन्ते किं गीतं भविष्यति ?

(घ) नरेन्द्रः किं करिष्यति ?

### ३. पूर्णवाक्येन उत्तरत –

(क) रविः स्वगृहे किं करोति ?

(ख) दशमीकक्षायाः बालिकाः कस्य गायनं करिष्यन्ति ?

(ग) रवेः कक्षायाः छात्राः किं करिष्यन्ति ?

(घ) केषां कृते अतिथयः पुरस्कारान् दास्यन्ति ?

(ङ) नाटिकायां रविः कस्य अभिनयं करिष्यति ?

### ४. अधोलिखितानि एकवचनरूपाणि द्विवचने बहुवचने च लिखत–

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | रविः | रवी | रवयः |
| (क) | मुनिः | ................. | ................. |
| (ख) | कपिः | ................. | ................. |
| (ग) | ऋषिः | ................. | ................. |
| (घ) | हरिः | ................. | ................. |

### ५. मञ्जूषातः उचित-अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –

श्वः, ह्यः, अधुना, अद्य

(क) अहम् ................. गीताम् पठितवान्।

(ख) यूयम् ................. कुत्र गमिष्यथ ?

(ग) ................. गणतन्त्रदिवसस्य उत्सवः अस्ति ।

(घ) ................. देशः स्वतन्त्र अस्ति ।

### ६. अधोलिखितानि एकवचन-क्रियापदानि द्विवचने बहुवचने च लिखत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | गमिष्यति – | गमिष्यतः | गमिष्यन्ति |
| (क) | पठिष्यति – | .............. | .............. |
| (ख) | लेखिष्यति – | .............. | .............. |
| (ग) | चलिष्यति – | .............. | .............. |
| (घ) | नेष्यति – | .............. | .............. |
| (ङ) | पतिष्यति – | .............. | .............. |

### ७. उदाहरणानुसारं सन्धिं कुरुत -

| | | | | | |
|---|---|---|---|---|---|
| **यथा -** | फलम् | + | पतति | = | फलं पतति। |
| (क) | अहम् | + | गच्छामि | = | .................................... |
| (ख) | वयम् | + | पठामः | = | .................................... |
| (ग) | त्वम् | + | वदसि | = | .................................... |
| (घ) | पत्रम् | + | लिखति | = | .................................... |
| (ङ) | यूयम् | + | लिखथ | = | .................................... |

### ८. प्रदत्तशब्दानां लृट्लकारस्य रूपाणि लिखत -

**( क ) प्रथमः पुरुषः**

| | धातुः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा- | भव् ( भू) | - | भविष्यति | भविष्यतः | भविष्यन्ति |
| | खाद् | - | खादिष्यति | ................. | ................. |
| | खेल् | - | ................. | खेलिष्यतः | ................. |
| | गम् | - | ................. | ................. | गमिष्यन्ति |

**( ख ) मध्यमः पुरुषः**

| | | | | | |
|---|---|---|---|---|---|
| यथा- | भव् ( भू) | - | भविष्यसि | भविष्यथः | भविष्यथ |
| | खाद् | - | खादिष्यसि | ................. | ................. |
| | खेल | - | ................. | खेलिष्यथः | ................. |
| | गम् | - | ................. | ................. | गमिष्यथ |

**( ग ) उत्तमः पुरुषः**

| | | | | | |
|---|---|---|---|---|---|
| यथा- | भव् ( भू) | - | भविष्यामि | भविष्यावः | भविष्यामः |
| | खाद् | - | खादिष्यामि | ................. | ................. |
| | खेल् | - | ................. | खेलिष्यावः | ................. |
| | गम् | - | ................. | ................. | गमिष्यामः |

**९. अधोलिखितानि वर्तमानकालरूपाणि भविष्यत्काले परिवर्तयत –**

| | | | | | |
|---|---|---|---|---|---|
| **यथा–पठति** | – | **पठिष्यति** | **वदामि** | – | **वदिष्यामि** |
| खादति | – | ……………… | खेलसि | – | ……………… |
| भवामि | – | ……………… | गच्छामः | – | ……………… |
| लिखन्ति | – | ……………… | करोति | – | ……………… |
| आगच्छथ | – | ……………… | वदावः | – | ……………… |
| पिबतः | – | ……………… | चलति | – | ……………… |

**१०. उदाहरणानुसारं भविष्यत्काल-वाक्यानि लिखत –**


| वर्तमानकाले | भविष्यत्काले | वर्तमानकाले | भविष्यत्काले |
|---|---|---|---|
| **यथा**–बालकः पठति। | बालकः पठिष्यति। | अहं खादामि। | अहं खादिष्यामि। |
| बालिका खादति। | ……………………। | सा लिखति। | ……………………। |
| वयं वदामः। | ……………………। | ते कुर्वन्ति। | ……………………। |
| त्वं खेलसि। | ……………………। | बालकाः गच्छन्ति। | ……………………। |
| अहं पश्यामि। | ……………………। | यूयं चलथ। | ……………………। |

## योग्यता-विस्तारः

**१. ध्यानेन पश्यत, पठत अवगच्छत च –**




आकाशे मेघाः सन्ति।
वृष्टिः भविष्यति ।



एषः लघुपादपः अस्ति।
एषः वृक्षः भविष्यति ।



अद्य शनिवासरः अस्ति ।
श्वः रविवासरः भविष्यति ।
अहं श्वः विद्यालयं न गमिष्यामि।



श्वः श्लोकपाठ-स्पर्धा भविष्यति ।
अहं श्लोकान् वदिष्यामि ।

२. एषः भविष्यत्काल-प्रयोगः। भविष्यत्कालस्य क्रियायाः प्रदर्शनार्थं संस्कृते लृट्लकारस्य प्रयोगः भवति। लृट्लकारस्य रूपाणि अनेन प्रकारेण प्रचलन्ति –

**पठ् धातुः लृट्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमः पुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमः पुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

यथा वर्तमानकालार्थे लट्लकारस्य रूपाणां प्रयोगः कृतः, तथा एव भविष्यत्कालार्थे लृट्लकारस्य रूपाणां प्रयोगः भवति। उपरि पठ्धातोः रूपाणि पठितानि।

३. कतिपय-धातूनां लृट्लकारस्य प्रथमपुरुष-एकवचनरूपाणि अधः प्रदत्तानि सन्ति। एतानि ध्यानेन पठत –

| धातुः | लट्लकारः (वर्तमानकालः) | लृट्लकारः (भविष्यत्कालः) | धातुः | लट्लकारः (वर्तमानकालः) | लृट्लकारः (भविष्यत्कालः) |
|---|---|---|---|---|---|
| आगम् | आगच्छति | आगमिष्यति | वद् | वदति | वदिष्यति |
| पा (पिब्) | पिबति | पास्यति | दृश् | पश्यति | द्रक्ष्यति |
| चल् | चलति | चलिष्यति | नी | नयति | नेष्यति |

४. अस्मिन् पाठे यूयम् इकारान्त-पुँल्लिङ्गशब्दानाम् अपि प्रयोगं दृष्टवन्तः । येषां पुँल्लिङ्गशब्दानाम् अन्ते 'इ' (इकारः) भवति, ते इकारान्त-पुँल्लिङ्गशब्दाः भवन्ति। पश्यत –

ह् + अ + र् + इ = हरि ( हरि + : = हरिः )

र् + अ + व् + इ = रवि ( रवि + : = रविः )

ग् + इ + र् + इ = गिरि ( गिरि + : = गिरिः )

म् + उ + न् + इ = मुनि ( मुनि + : = मुनिः )

५. एते सर्वे इकारान्त-पुँल्लिङ्गशब्दाः सन्ति। एतेषां प्रथमा-द्वितीया-षष्ठी-विभक्तिषु रूपाणि एवं प्रचलन्ति –

**प्रथमा विभक्तिः**

| शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| हरि | – | हरिः | हरी | हरयः |
| रवि | – | रविः | रवी | रवयः |
| गिरी | – | गिरिः | गिरी | गिरयः |
| मुनि | – | मुनिः | मुनी | मुनयः |

## द्वितीया विभक्ति :

| शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| हरि | - | हरिम् | हरी | हरीन् |
| रवि | - | रविम् | रवी | रवीन् |
| गिरी | - | गिरिम् | गिरी | गिरीन् |
| मुनि | - | मुनिम् | मुनी | मुनीन् |

## षष्ठी विभक्तिः

| शब्दः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| हरि | - | हरेः | हर्योः | हरीणाम् |
| रवि | - | रवेः | रव्योः | रवीनाम् |
| गिरि | - | गिरेः | गिर्योः | गिरीणाम् |
| मुनि | - | मुनेः | मुन्योः | मुनीनाम् |

परिशिष्टस्य साहाय्येन अन्यासां विभक्तीनां रूपाणि अपि जानीत।

६. (ं) एतत् चिह्नं संस्कृतभाषायाम् 'अनुस्वारः' इति कथ्यते। सामान्यतः अनुस्वारस्य प्रयोगः 'म्' इत्यस्य स्थाने भवति।

**यथा** - अहम् - अहं
त्वम् - त्वं
रामम् - रामं

वाक्ये अनुस्वार-प्रयोगस्य एकः नियमः अस्ति । शब्दस्य अन्ते स्थितस्य 'म्' इत्यस्य पश्चात् यदि व्यञ्जनवर्णः भवति, तर्हि 'म्' इत्यस्य स्थाने अनुस्वारः (ं) भवति ।

**यथा** - (क) त्वम् + गच्छसि = त्वं गच्छसि।
(ख) अहम् + पठामि = अहं पठामि।
(ग) वयम् + लिखामः = वयं लिखामः।
(घ) फलम् + पतति = फलं पतति।

किन्तु यदि 'म्' इत्यस्य पश्चात् स्वरवर्णः भवति, तर्हि किमपि परिवर्तनं न भवति।

**यथा** - (क) त्वम् + असि = त्वम् असि।
(ख) अहम् + इच्छामि = अहम् इच्छामि।
(ग) पुस्तकम् + अस्ति = पुस्तकम् अस्ति।
(घ) अहम् + अस्मि = अहम् अस्मि।

**अध्यापकाय निर्देशः -**

- अध्यापकः अन्येषां धातूनां लृट्लकार-रूपाणाम् अभ्यासं प्रयोगं च कारयेत्।
- इकारान्त-पुँल्लिङ्गशब्दानां प्रथमा-द्वितीया-षष्ठीविभक्तीनां रूपाणां सामान्यपरिचयं कारयेत्।
- परिशिष्टे प्रदत्तानां लृट्लकारस्य इकारान्त-पुँल्लिङ्गशब्दानां च रूपाणाम् अपि अभ्यासं कारयेत्।